# संस्कृत वार्ता:

दिनाङ्क : 16/03/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- अद्य सायङ्काले गुजरात-राज्यस्य मुन्द्रा-पोताश्रये एल.पी.जी-वाहकपोतः 'शिवालिकः' प्राप्तवान्। अन्यः भारतीय-पोतः 'नन्दा देवी' श्वः आगमिष्यति।
- बिहार-ओडिशा-हरियाणा-राज्येषु राज्यसभायाः एकादश आसनानां कृते अद्य मतदानं संपन्नम्, अधुना मतगणना प्रचलति।
- लोकसभायां षड्विंशत्युत्तर द्विसहस्रतम वर्षस्य - सप्तविंशत्युत्तर द्विसहस्रतम वर्षस्य च कृते रेल-मन्त्रालयस्य अधीनं अनुदानविषयेषु चर्चा समारब्धा।
- निर्वाचन-आयोगेन पश्चिम-बङ्गाल-राज्यस्य चतुर्णां वरिष्ठ-आरक्षकाधिकारिणाम् तत्कालं स्थानान्तरणं कृतम्।
- साहित्य-अकादमी अद्य चतुर्विंशति-भारतीयभाषासु स्वकीयान् वार्षिक-साहित्य-अकादमी-पुरस्कारान् अघोषयत् तत्र हि हिन्दी-लेखिका ममता कालिया तथा च संस्कृत भाषाया: साधु भद्रेशदास: साहित्य-अकादमी-पुरस्कारेण सम्मानितौ भविष्यतः।

-------------------------------------------

<u>अन्तर-मन्त्रालयीय-सूचना</u>

अद्य सायङ्काले गुजरात-राज्यस्य मुन्द्रा-पोताश्रये एल.पी.जी-वाहकपोतः 'शिवालिकः' प्राप्तवान्। नवदेहल्यां पश्चिम-एशिया-विषये आयोजिते अन्तर-मन्त्रालयीय-संवादे पत्तन-पोत-परिवहन-मन्त्रालयस्य विशेष-सचिवः राजेशकुमार सिंहः सूचितवान् यत् पोताश्रये प्राथमिकताधारेण स्थानं निश्चितं कृतं येन सामग्री-निक्षेपणे विलम्बः न भवेत्। तेन उक्तं यत् अन्यः भारतीय-पोतः 'नन्दा देवी' श्वः आगमिष्यति। पेट्रोलियम-मन्त्रालयस्य संयुक्त-सचिवः सुजाता शर्मा सूचितवती यत् देशे खनिजतैलं पर्याप्तमात्रायां उपलब्धम् अस्ति तथा च पेट्रोल-पम्प-केन्द्रेषु तैलस्य न्यूनता नास्ति।

विदेश-मन्त्रालयस्य प्रवक्ता रणधीर जायसवालः सूचितवान् यत् ईराने स्थिताः प्रायः पंचाशदुत्तरपंचशत् भारतीयाः आर्मेनिया-देशं तथा दश भारतीयाः अज़रबैजान-देशं स्थलसीमायाः माध्यमेन प्रविष्टवन्तः। तेन सूचितं यत् सङ्कटकाले अपि ईराने स्थितः भारतीय-दूतावासः पूर्णतया सक्रियः अस्ति।

---------------------------------------------

राज्यसभा एल पी जी

राज्यसभायाः सभाध्यक्षः जे. पी. नड्डाः देशे सूचितस्य एल्. पि. जि. सङ्कटकालस्य विषये काङ्ग्रेस्-दलं राजनीतिं कुर्वन् अस्ति इति आरोपयन्, वर्तमानसङ्कटः भारतस्य कारणात् नास्ति, तस्य निर्माणे भारतस्य किमपि योगदानं नास्ति इति उक्तवान्। सः सभायै सूचितवान् यत् विद्यमानायाः अन्ताराष्ट्रिय-परिस्थित्याः कारणात् सङ्कटं उद्भूतम् अस्ति। अस्य सङ्कटकालस्य प्रतिक्रियारूपेण, सर्वकारः विस्तृतं चर्चां कृत्वा परिस्थितिं स्पष्टतया व्याख्यायितवान्, परन्तु ते श्रोतुं न इच्छन्ति।

इतः प्राक् शून्यहोराकाले विपक्षस्य नेता मल्लिकार्जुन खर्गे वर्यः सदने एल. पी. जी. इत्यस्य विषयं उपस्थापितवान् तथा च सङ्कटकालस्य निवारणार्थं आवश्यकानि उपायानि न स्वीकर्तुं अपि आरोपितवान्।

---------------------------------------------

राज्यसभाया- निर्वाचन

बिहार-ओडिशा-हरियाणा-राज्येषु राज्यसभायाः एकादश आसनानां कृते अद्य मतदानं संपन्नम्, अधुना मतगणना प्रचलति। बिहारराज्यस्य पञ्चसु आसनेषु, ओडिशायाः चतुर्षु तथा च हरियाणायाः द्वयोः आसनयोः कृते एतत् निर्वाचनम् अभवत्। इतः प्राक् विभिन्नराज्यानां षड्विंशति अभ्यर्थिनः निर्विरोधं राज्यसभायै निर्वाचिताः सन्ति।

---------------------------------------------

राज्यसभा गोगोई

राज्यसभया अद्य नामाङ्कितं सदस्यं रञ्जन गोगोई वर्यं निवृत्तिः प्रदत्तम्, योहि अद्य उच्चसदनस्य कार्याविधिं समापयत्। प्रातः एकादशवादने यदा सभायाः आरम्भः अभवत् तदा सभापतिना सी. पी. राधाकृष्णन् वर्येण घोषणा एषा कृता। सः अवदत् यत्, भारतस्य पूर्वमुख्यन्यायाधीशेण श्री गोगोई वर्येण भारतस्य राष्ट्रपतिना कृत नामाङ्कनान्तरम् विंशत्यधिक द्विसहस्रतम वर्षस्य मार्च्-मासे सभायां स्वीया यात्रा समारब्धा। राधाकृष्णन् वर्यः अवदत् यत्, विशिष्टेन न्यायविदेन श्री गोगोई वर्येण राज्यसभायाः चर्चासु अपूर्वं विधिज्ञानं अनुभवं च आनितम्।

---------------------------------------------

## लोकसभायां रेल-मन्त्रालयः चर्चा

लोकसभायां षड्विंशत्युत्तर द्विसहस्रतम वर्षस्य - सप्तविंशत्युत्तर द्विसहस्रतम वर्षस्य च कृते रेल-मन्त्रालयस्य अधीनं अनुदानविषयेषु चर्चा समारब्धा। चर्चां प्रारभमाणः काङ्ग्रेस-दलस्य तारिक अनवरः आरोपयद् यत् सर्वकारः स्वलक्ष्याणां प्राप्तौ विफलः अभवत्। सः उक्तवान् यत् 'अमृत भारत स्टेशन' योजनायाः अन्तर्गतं सप्तत्रिंशदुत्तर त्रयोदशशत स्थानकेषु केवलं षष्ट्युत्तरैकशत स्थानकेषु एव पुनर्विकास-कार्यं पूर्णं जातम्। अनवर-महोदयः एतदपि आरोपयत् यत् सर्वकारः यात्रीसुरक्षायाः नाम्नि केवलं घोषणाः करोति, तथा च सः भारतीय-रेलमार्गेषु वृत्तेः न्यूनतां प्रति चिन्तां प्रकटितवान्। अपरपक्षे भाजपेति दलस्य गणेश सिंहः उक्तवान् यत् गतदशवर्षेषु रेलक्षेत्रे महत्त्वपूर्णं परिवर्तनं जातम्। सः अवदत् यत् त्रिदशाधिकद्विसहस्रतमे वर्षे रेलआयव्ययकं केवलं त्रिषष्टि-सहस्र-कोटि-रूप्यकाणि आसीत्, यत् अधुना वर्धित्वा द्वि दशांश सप्त अष्ट लक्ष-कोटि-रूप्यकाणि अभवत्।

---------------------------------------------

## निर्वाचनायोगः- स्थानान्तरणम्

निर्वाचन-आयोगेन पश्चिम-बङ्गाल-राज्यस्य चतुर्णां वरिष्ठ-आरक्षकाधिकारिणाम् तत्कालं स्थानान्तरणं कृतम्। निर्वाचनायोगेन राज्यस्य आरक्षक-महानिदेशकस्य, कारागार-सेवा-महानिदेशकस्य, अतिरिक्त-महानिदेशकस्य अपि च कोलकातायाः आरक्षक-आयुक्तस्य

स्थानान्तरणस्य आदेशो प्रख्यापितः। अवधेयं यत् द्विनवत्युत्तर-नवदश-शततम-वर्षस्य आई.पी.एस. अधिकारी सिद्धनाथ गुप्तः इदानीं पश्चिम-बङ्गालस्य नूतनः आरक्षक-महानिदेशको भविष्यति। सममेव षण्णवत्युत्तर-नवदशत-तम-वर्षस्य आई.पी.एस. अधिकारी अजयकुमार नन्दः कोलकाता-नगरस्य आरक्षक-आयुक्तत्वेन नियुक्तः। एकनवत्युत्तर-नवदश-तमवर्षस्य आई.पी.एस. अधिकारी एन. रमेश बाबू कारागार-सेवा-महानिदेशकत्वेन कार्यं विधास्यति। चतुर्नवत्युत्तर-नवदशतम-वर्षस्य आई.पी.एस. अधिकारी अजय मुकुन्द रानाडे अतिरिक्त-महानिदेशकत्वेन नियुक्तः।

---------------------------------------------

## साहित्य-अकादमी-पुरस्कार

साहित्य-अकादमी अद्य चतुर्विंशति-भारतीयभाषासु स्वकीयान् वार्षिक-साहित्य-अकादमी-पुरस्कारान् अघोषयत्। हिन्दी-लेखिका ममता कालिया स्वस्य 'जीते जी इलाहाबाद' इत्यस्य कृते, प्रसिद्धः नवतेज सरना महोदयः स्वस्य 'क्रिम्सन स्प्रिंग' (Crimson Spring) इति आङ्ग्ल-उपन्यासाय, संस्कृत भाषाया: साधु भद्रेशदास: च साहित्य-अकादमी-पुरस्कारेण सम्मानिता: भविष्यन्ति। संस्कृति-मन्त्रालयानुसारं अस्मिन् वर्षे अष्टौ काव्य-पुस्तकानि, चत्वारः उपन्यासाः, षट् कथा-सङ्ग्रहाः, द्वौ निबन्धौ च एतं सम्मानं प्राप्तवन्तः। एतदतिरिक्तं एकं साहित्यिक-समालोचनं, एकं आत्मचरितं तथा द्वौ संस्मरणौ अपि पुरस्कारार्थं चितौ। प्रत्येकं विजेत्रे एक-लक्षं रूप्यकाणि, एकः उत्कीर्ण-ताम्रफलकः पुरस्काररूपेण मार्च-मासस्य एकत्रिंशत् दिनाङ्के एकस्मिन् विशेष-समारोहे प्रदास्यन्ते।

---------------------------------------------

## ओडिशा-चिकित्सालये अग्निकाण्डः

अद्य प्रातः ओडिशा-राज्यस्य कटक-नगरे स्थिते एस.सी.बी-आयुर्विज्ञान-महाविद्यालयस्य आघात-निवारण-गहन-चिकित्सा-विभागे अग्निकाण्डेन न्यूनातिन्यूनं दश रुग्णाः मृत्युमुपगताः। एषा दुर्घटना विद्युत्-लघुपथेन जाता इति आशंक्यते, येन चिकित्सालये भीतिः अभवत्।

मुख्यमन्त्री मोहनचरण माझी महोदयः उक्तवान् यत् सप्त रुग्णाः चिकित्सा-कक्षे एव मृताः, अन्ये त्रयः तु अन्यत्र स्थानान्तरण-समये प्राणान् अत्याक्षुः।

राष्ट्रपतिः द्रौपदी मुर्मु, उपराष्ट्रपतिः सी. पी. राधाकृष्णन् तथा प्रधानमन्त्री नरेन्द्रमोदी च एतस्यां घटनायां शोकं प्रकटितवन्तः। प्रधानमन्त्रिणा 'प्रधानमन्त्री-राष्ट्रीय-सहायता-कोषात्' मृतानां परिवारेभ्यः द्विलक्षरूप्यकाणि सममेव व्रणितेभ्यः पंचाशत्सहस्रं रूप्यकाणि दातुं घोषणा कृता।

।। इति वार्ता: ।।